# Kamakshi Stava

# કામાક્ષીસ્તવઃ

## Document Information

Text title : Kamakshi Stava

File name : kAmAkShIstavaH.itx

Category : devii, devI

Location : doc_devii

Proofread by : Mohan Chettoor

Description/comments : From Stotras Samahara Part 1 (ed. K.Raghavan Pillai)

Latest update : September 4, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 4, 2022

*sanskritdocuments.org*

# કામાક્ષીસ્તવઃ

કણ્ડૂલગણ્ડવિગળન્મદવારિધારા-
    ગણ્ડૂષપણ્ડિતમધુવ્રતમણ્ડિતાય ।
શુણ્ડાલબન્ધુરમુખાય તુષારભાનુ-
    ખણ્ડાવતંસકલિતાય નમઃ શિવાય ॥ ૧॥

રસાળતલભૂષિતં રજનિબન્ધુના ભૂષિતં
    સમગ્રમનુકમ્પયા સવિધસેવિતં કમ્પયા ।
નમત્સુમનસં પદે નમત સન્તતં સમ્પદે
    ગિરીશમધિકાઞ્ચિ તં ગિરિસુતાકુચાઙ્કાઞ્ચિતમ્ ॥ ૨॥

જયન્તિ શ્રીમન્તો જડિમહિમસંહારમિહિરા
    મનીષામાકન્દપ્રસવનવવાસન્તદિવસાઃ ।
ગિરાં નાથે! નાનારસભણિતિયોષાભિસરણ-
    પ્રદોષા નિર્દોષાસ્તવ ચરણ સન્નામવિધયઃ ॥ ૩॥

ક એષ પ્રસ્તાવસ્તવ નવનસન્નાહપદવી -
    દવીયો દેવીદં ધિષણધિષણાનૈપુણમપિ ।
તદાસ્તામુદ્યોગઃ સ્તુતિવચસિ યાચે પુનરિદં
    સમસ્તોઽત્ર સ્તોત્રીભવતુ મમ સઞ્જલ્પનવિધિઃ ॥ ૪॥

સદા યાચં યાચં કથિતબહુવાચં જનમિમં
    પ્રતિ ક્રોધો વેધોરમણિ! કરણીયો ન કલયા ।
ન યોગપ્રાવીણ્યં ન ચ બહુવિધસ્તોત્રપટિમા
    ન વા સેવાદાક્ષ્યં કિમિહ વિદધે યાચનમૃતે ॥ ૫॥

જતુદ્રાવં દેવિ! દ્રવતુ જવતશ્ચિત્તજડિમા
    શરત્પદ્મોન્મીલં મમ વિલલમુન્મીલતુ મનઃ ।
મુખાદ્વીચી વાચાં ત્રિદિવવિગળન્નિર્જરધુની-
    તરઙ્ગાળીગાળં ગળતુ મધુનિષ્યન્દમધુરા ॥ ૬॥

જગન્નાથે ! જાલ્મં નિબિડજડિમગ્રન્થિજટિલં
    જનં દીનં મૈનં જનનિ ! મનુથાઃ સ્માન્યશરણમ્ ।
પ્રમીળાપ્રમ્લાનં પદયુગળનાળીકવિગળ-
    ન્મધૂળીપાળીભિર્મમ સરજસં ક્ષાળય મનઃ ॥ ૭॥

જગન્માતર્જાતપ્રથિમનિ મનીષાજડિમનિ
    સ્તૃણાને ખિન્દાનઃ કિમિવ મનવૈ કિં વિતનવૈ ।
પ્રસીદાસીદાત્મન્યખિલદુરિતોત્સાદિનિ ! દિને
    દિને દીનેઽદીને! મયિ વિતર કારુણ્યકણિકામ્ ॥ ૮॥

કરે વામે વામે ! કમલમૃદુળે પુસ્તકધરં
    પરસ્મિન્ સાક્ષસ્રક્સ્ફટિકનિભમત્રાસવરદમ્ ।
ભવત્વન્તઃ સાક્ષાદકૃપણકૃપાકન્દળમિળત્-
    કટાક્ષવ્યાપારં વપુરુપનિષજ્જીવિતમિદમ્ ॥ ૯॥

કૃપાકોપાટોપસ્ફુરિતપદપઞ્ચાસ્યદળિતાદ્
    ધનસ્વાન્તધ્વાન્તપ્રકરકરિસન્દોહશિરસઃ ।
સમુન્મુક્તા મુક્તામણય ઇવ શુદ્ધા ભણિતયોસ
    ભવદ્ભક્તાસ્યેભ્યો ભગવતિ! વિસર્પન્તિ પરિતઃ ॥ ૧૦॥

મમાન્તર્વાણિ ! ત્વં હર તિમિરમિત્યર્થનવિધાં
    વિધાસ્યન્ યસ્તસ્મૈ પદયુગળમાત્રં કથયતે ।
અસૌ શાસ્ત્રજ્ઞત્વં વરયિતુમુપક્રાન્ત ઇતિ તદ્
    દદાનઃ સદ્યસ્તે જયતિ સદયાસમ્ભ્રમરસઃ ॥ ૧૧॥

અસૌ સેવા દાવે રુદિતમિયમિજ્યા જલલિપિ-
    ર્ગજસ્નાનં ધ્યાનં તદપિ સ જપો ભસ્મનિ હુતમ્ ।
પ્રણામો નામષ પ્રકૃતિજળમૂકાઙ્ઘ્રિપતનં
    યદમ્બાલમ્બ્યેત પ્રતિદિનમનુદ્દિશ્ય ભવતીમ્ ॥ ૧૨॥

સજીવો મા જીવન્ ભવતિ બત મા જાગ્રદપિ મા
    વિજાનન્ મા ધ્યાયન્ જનજનનિ ! તસ્યાસ્ત્વજનનિઃ ।
ન યસ્ત્વામાશાસ્તે ન વિનમતિ ન સ્તૌતિ મનુતે
    ન નોપાસ્તે નાધ્યેત્યવતિ ન વૃણીતે ન ચ સકૃત્ ॥ ૧૩॥

ગળદ્દમ્ભાં શુમ્ભત્પૃથુલકુચકુમ્ભાં હૃતશશિ-

પ્રભાડમ્ભાં સમ્ભાવિતલિખિતગુમ્ફાજપપટામ્ ।
મનસ્તમ્ભારમ્ભપ્રથુમનિ(?) ભજે ત્વાં કૃતકૃપા-
પરીરમ્ભામ્મમ્ભોરુહસદનસમ્ભોગકલિકામ્ ॥ ૧૪॥

ભવત્યા નિત્યોત્તંસિતસિતસુધાતિવિગળત્-
સુધાસારસ્રોતોવિસર ઇવ હૃત્પઙ્કજજુષઃ ।
નૃણાં ત્વદ્ધ્યાતૄણાં નવવદનનાળીકકુહર-
પ્રણાળીનાળેન ક્ષરતિ કવિતાસૌરભભરઃ ॥ ૧૫॥

ગતિસ્વિન્નાં વન્યસ્તબકનિવહન્યાસવિલસત્-
કચાં કેચિત્ કાચાવલિખચિતનીચેતરકુચામ્ ।
હૃદિ ત્વામીક્ષન્તે કપટમૃગયોઃ પત્રપટલી-
દુકૂલાં કાલારેરનુપદચરીં કાનનચરીમ્ ॥ ૧૬॥

ધરે ! દુર્ગાં સ્વર્ગા ધિપવિમતવર્ગાપહરણીં
મહારંહસ્સિંહપ્રવરપરિવિન્યસ્તચરણામ્ ।
કરે વલ્ગત્ખડ્ગપ્રવિહિતજગત્ત્રાણવિભવાં
ભવાર્તિવ્યાવૃત્ત્યૈ ભગવતિ ! ભજન્તે હિ ભવતીમ્ ॥ ૧૭॥

ઇદં સ્યાદેતત્ સ્યાન્મમ પુનરદઃ સ્યાદિતિ સદા
શ્રુતં વા દૃષ્ટં વા સકલમુપયાચે ન ભવતીમ્ ।
સકૃન્મહ્યં મુહ્યન્મલિનમનસે માતરમલાં
ત્વદીયે દીયેત દ્યુતિમતિ પદે ભારતિ! રતિમ્ ॥ ૧૮॥

અથો યા વા સા વા ભવ ભવરમેશામ્બુજભુવા-
મપીડ્યે ! પીડ્યેઽહં જનજનનિ ! જાડ્યેન ન યથા ।
તથા ભૂયાદ્ ભૂયાનિહ તવ વિભૂતિસ્તવવિધિઃ
કથઙ્કારં કર્તું કવિભિરપિ શક્યેત સકલઃ ॥ ૧૯॥

(This stotra is in high-flown style in praise
of goddess Sarasvati, most probably goddess
kAmAkShI of the Kanchipuram tmeple.)

ઇતિ કામાક્ષીસ્તવઃ સમ્પૂર્ણઃ ।

Proofread by Mohan Chettoor

*Kamakshi Stava*

pdf was typeset on September 4, 2022

Please send corrections to *sanskrit@cheerful.com*